# संस्कृतकथानाम् उपजीव्यग्रन्थाः

डॉ. रामपालशुक्लः
संस्कृतविभागाध्यक्षः
पारम्परिकसंस्कृतविभागः
बरोडा-संस्कृतमहाविद्यालयः
म.स.विश्वविद्यालयः,वटोदरम्

संस्कृतवाङ्मये कथासाहित्यम् अनितरसाधारणं स्थानमधिकरोति । कथामुखेनाति-मनोरञ्जकतया विविधसदुपदेशप्रदानमेवास्य प्रमुखं प्रयोजनम् ।

कथाशब्दः कथ् वाक्यप्रबन्धे चुरादिगणीयधातोः 'चिन्तिपूजिकथिकुम्बिचर्चश्च-इति सूत्रेण अङ् प्रत्ययेन टापि कृते सिध्यति ।

प्रबन्धकल्पना कथाऽपि कथ्यते । संस्कृतसाहित्ये कथासाहित्यमपि शाखान्तरवद्विकसितं समृद्धञ्च दृश्यते । अस्य साहित्यस्य प्रादुर्भावः कुतः समजायत । तर्हि ऋग्वेदस्य दशममण्डलस्य सरमायाः पणिनाञ्च संवादो लभ्यते । ब्राह्मणग्रन्थेषु उपनिषत्सु च लभ्यते छान्दोग्योपनिषदि । (१/२२/१) पशूनामन्नार्थं संघटनं तत्र श्रूयते तत्र वृषयो हंसो मद्गुश्च जाबालं सत्यकामं ब्रह्मविद्यामुपदिशति महाभारते रामायणे च अनेके कथाः समुपलभ्यन्ते एते ग्रन्थाः कथासाहित्यस्याधारभूमिः अग्रे एतेभ्य ग्रन्थेभ्यः समाहृत्य समाहृत्य यत्र कुत्रचित्तु कुतुहलं, क्वचित्तु घटनावैचित्र्यं क्वचित्तु हास्यविनोदः क्वचिदुपदेशोऽयं क्वचित्तु रसवत्काव्यस्य छटापि दृश्यते । समुदितदृष्ट्या कथासाहित्यमिदं हि मानवचिन्तनस्य नितान्तं विकसितं रूपं विद्यते ।

अग्रे समीक्षकैः विद्वद्भिरेतद् द्वेधा विभज्यते । उपदेशात्मक-मनोरञ्जनात्मकभेदात् । केचित् कथयन्ति नीतिकथा लोककथा चेति।

उपदेशप्रदकथाप्रसङ्गः पशुपक्षिमुखेनोपक्रमते । मनोरञ्जककथाकलापस्तु मनुष्यजीवनस्य प्रकल्पितगाथामुखेन किमपि मनोरञ्जकं चित्रणं पुरस्करोति । एतत्साहित्यप्रसरे लोकविश्रुत-प्राचीनतमस्य बृहत्कथाख्यस्य सन्दर्भस्य स्थानं अतीवगौरवशालि महाराजहालानामकस्य नृपतेः

राजकविना अद्भुतसाहित्यसम्पदाढ्येन गुणाढ्येन बृहत्कथेयं प्राथम्येन प्रणिबद्धा । इयं हि खलु बृहत्कथा इतरानखिलानपि कथासन्दर्भानतिशेते । काव्यादर्शे दण्डिना लिखितं 'भूतभाषामयी प्रादुरद्भुतार्थां बृहत्कथाम् '। त्रिविक्रमेनोक्तम्-

**धनुषेव गुणाढ्येन निःशेषो रञ्जितो जनः ।**

मूलतः पैशाचीभाषया निबद्धा पैशाचीभाषेयं प्राकृतभाषाष्वन्यतमा वर्तते । सेयं कथा यस्याः परिचयः प्राकृतव्याकरणग्रन्थेषु प्रस्फुटं प्रकटीभवति। अधुना तु बृहत्कथायाः त्रयः संस्कृतानुवादाः लभ्यन्ते, । श्लोकसंग्रहाख्यो विशदसन्दर्भः । द्वितीयो ग्रन्थः बृहत्कथामञ्जरी यस्य रचना आचार्यक्षेमेन्द्रेण कृता । यत्र ७५०० पञ्चसप्ततिसहस्रमितैः श्लोकैः सुविश्रुतो ग्रन्थः। तृतीयः कथासरितसागरः कविवरसोमदेव विरचितः ते इमे सर्वेऽपि सन्दर्भाः बहुशः गुणाढ्यीयबृहत्कथामुपजीव्यैव कवीन्द्रैः प्रावर्त्तिषन् सोमदेवः स्वयमेव लिखति-

**यथामूलं तथैवैतन्न मनागव्यतिक्रमः ।**
**ग्रन्थविस्तार संक्षेपमात्रं भाषा च भिद्यते ।**

गुणाढ्येन भगवतो भवानीपतेः मुखपद्माद् उपश्रुत्य कथेयं निबद्धा, गद्यबधा पद्यबद्धा इत्यत्र भिद्यन्ते । काव्यादरविलोकनेनावबुध्यते यदियं पद्यात्मिका ।

वैदिकसाहित्ये वेदेषु ब्राह्मणेषु आरण्यकेषु उपनिषत्सु यापि दृष्टपूर्वा तथापि कथांशप्राधान्यादेव अस्याः एतत्सरलिप्रलनयोपज्ञता गुजाढयमेव संश्लिष्यति इत्यत्र न संदेहावसरः। पञ्चतन्त्रं सर्वैः ज्ञायते अस्य तुलनां विश्वसाहित्ये नाद्यापि बिभर्ति कश्चनान्योग्रन्थः। चत्वारिंशद् भाषासु अस्यानुवादः जातः । सर्वप्रथमं अस्यानुवादः पहलवीभाषायां नौशेरवाननाम्ना नृपतिना षष्ठशताब्द्यां प्रवर्त्तितः । तदनु सीरिभाषायां कलिलग दमनग-नाम्ना ततः अरबीभाषायां ग्रन्थोऽनूदितो वर्तते । कालक्रमेण अस्यानुवादः बहोवो जाताः । (इवनुलमुक्फ्फा) अरबीभाषायां पद्यानुवादः सहलबिन नववरख्तनामा विदुषा कृतः । कीर्तिमाश्रिभास्य लैटिन-ग्रीक-जर्मन फेंच स्पेनिशाङ्गभाषाष्वपि खल्वनुवादाः समपद्यन्त । ततः बृहत्कथामतिरिच्य कलिवरशिवदासविरचितो वेतालपञ्चविंशतिकाद्भुत कथासंग्रहो ग्रन्थः । एवमेव सिंहास्थ द्वात्रिंशिंका, द्वात्रिंशत्पुत्तलिका चेतिनाम्ना प्रसिद्धा अन्ये

गाथा- ग्रन्थाः । शुकसप्ततिः इति नाम्ना एकोऽन्यः कथासन्दर्भः । सवाअपि एताः उपदेशपदाः सन्मार्गप्रिदर्शिकाश्वः विद्यापतेः पुरुषपरीक्षा-मैथिलपण्डितेन विद्यापतिना मनुष्यपात्रमालभ्ब्य पञ्चतन्त्रशैल्यां ग्रन्थः प्रणीतः । १४६५ शताब्द्याम्। भोजप्रबन्धवल्लालस्य प्रसिद्धं । इतःपरम् लघुकथापरम्परा लोककथा परम्पराचेत् एतस्या : कस्मिन्नपि साहित्ये प्राचीनतमत्वं निर्विवादमेव। लोककथास्तु लेखनीं वा पत्रमनपेक्ष्यैव कर्णपरम्परया अनादिकालदेव लोके विचरन्ति प्रवहन्ति च। तासु काश्चिदादाय केचिद् पण्डिताः कवयितं् प्रभवन्ति ?

आसां हि लोकरञ्जनमेव चरमं लक्ष्यम् । स्रोतस्तु वीरगाथादि । वस्तुतो हि लघुकथायां लोककथायां वा कस्यापिवीरस्य चरितम् , वा कस्यचिद्युगलस्य प्रेमलीला कस्यचिद्दुर्जनस्य अनाचारलीला वर्णिता भवति ।

सम्प्रति समुपलभ्येषु, प्रकाशितेषु कथासरितायां गुणाढ्यस्यैव । तत एव वेतालपञ्चविंशतिका, शुकसप्ततिः भोजप्रबन्धः कथार्णवः जातकमाला कथाकौतुकं च केचित् प्रसिद्धाः कथाग्रन्थाः। अन्येऽपि बहवः कथाग्रन्थाः कर्णगोचरा भवन्ति । परन्तु ते नाऽत्रोपवर्ण्यन्ते ।

संस्कृतसाहित्ये वैदिक-लौकिकपौराणित कथान्तर्गल कथाः समाश्रित्यैव भास-श्रीहर्षभट्टनारायण- प्रभृतयो महाकवयः स्व-स्व-कथासन्दर्भान् जग्रन्थुः । ततः विंशतिशताब्दौ अपि अनेकाः कथाः नूतनलेखकैरपि रचिताः । कथासाहित्यस्याधारभूमिः वेदः एव ।